0/c

A-I/1/1262/22

प्रथमसत्रार्द्धम्

प्रथमपत्रम्

फलितज्यौतिषम्

समयः घण्टात्रयम् | पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. किन्नाम पञ्चाङ्गम्?

2. कानि चरकरणानि?

3. का नाम भद्रा?

4. कृतिकानक्षत्रस्य प्रथमचरणे जातस्य आद्यक्षरं किम्?

5. पुष्यनक्षत्रस्य योनिः का?

अथवा

भभोगः कः?

6. सौरमासः कः?

7. को नाम इष्टकालः?

अथवा

मिथुनराशेः लङ्कोदयमानं किम्?

8. का नाम पलभा?

अथवा

दिवापूर्वनतं किम्?

9. के षड्वर्गाः?

10. नवमाशः कः?

अथवा

रवेः मित्राणि कानि?

11. मङ्गलस्य शत्रुः कः?

12. रवेः उच्चस्थानं किम् ?

अथवा

मङ्गलस्य परमोच्चांशाः कति ?

13. विंशोत्तरीमहादशायां राहोः दशावर्षसंख्या का ?

14. स्थिरकारके सप्तमकारकग्रहः कः ?

15. मुंथायाः दैनिकी गतिः का ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. तिथिक्षयः कथं भवति ? सोदाहरणं लिखत।

अथवा

स्वकल्पितोदाहरणेन सूर्यस्पष्टसाधनं प्रतिपादयत।

17. भयात-भभोगानयनप्रकारः लेख्यः।

अथवा

नवांशविचारः कथं क्रियते ? लिखत।

18. पञ्चधामैत्रीविचारं स्पष्टयत।

अथवा

अन्तर्दशासाधनप्रकारः लेख्यः।

19. लग्नादिद्वादशभावानां स्थिरकारकाः ग्रहाः के ? लिखत।

20. ग्रहाणां बाल्याद्यवस्थाविचारः यथाग्रन्थं लिखत।

**स. दीर्घोत्तरीयः प्रश्नः समाधेयः।** (1×20=20)

21. स्वकल्पितोदाहरणेन प्रथमलग्नसाधनं प्रतिपादयत।

अथवा

नैसर्गिकमित्रामित्रविचारः लेख्यः।

अथवा

सोदाहरणं मध्यमायुस्साधनं स्पष्टयत।